শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে

# ॥ একত্রিংশঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ একৱিংশঃ সর্গঃ ॥

## শ্রীরামস্য সমুদ্রতটে কুশানাস্তীর্য দিনত্রযং যাৱদুপৱেশনং ততোঽপি স্বাত্মানমদর্শযতঃ সমুদ্রস্যোপরি কুপিতেন শ্রীরামেণ বাণপ্রহারেণ তস্য ৱিক্ষোভণম্

ততঃ সাগরৱেলাযাং দর্ভানাস্তীর্য রাঘৱঃ।
অঞ্জলিং প্রাঙ্মুখঃ কৃৎৱা প্রতিশিশ্যে মহোদধেঃ॥ **6.21.1** ॥

বাহুং ভুজঙ্গভোগাভমুপধাযারিসূদনঃ।
জাতরূপমযৈশ্চৈৱ ভূষণৈর্ভূষিতং পুরা॥ **6.21.2** ॥

মণিকাঞ্চনকেযূরমুক্তাপ্রৱরভূষণৈঃ।
ভুজৈঃ পরমনারীণামভিমৃষ্টমনেকধা॥ **6.21.3** ॥

চন্দনাগুরুভিশ্চৈৱ পুরস্তাদভিসেৱিতম্।
বালসূর্যপ্রকাশৈশ্চ চন্দনৈরুপশোভিতম্॥ **6.21.4** ॥

শযনে চোত্তমাঙ্গেন সীতাযাঃ শোভিতং পুরা।
তক্ষকস্যেৱ সম্ভোগং গঙ্গাজলনিষেৱিতম্॥ **6.21.5** ॥

সংযুগে যুগসঙ্কাশং শত্রূণাং শোকৱর্ধনম্।
সুহৃদাং নন্দনং দীর্ঘং সাগরান্তৱ্যপাশ্রযম্॥ **6.21.6** ॥

অস্যতা চ পুনঃ সৱ্যং জ্যাঘাতৱিহতৎৱচম্।
দক্ষিণো দক্ষিণং বাহুং মহাপরিঘসন্নিভম্॥ **6.21.7** ॥

গোসহস্রপ্রদাতারং হ্যুপধায ভুজং মহৎ।
অদ্য মে তরণং ৱাথ মরণং সাগরস্য ৱা॥ **6.21.8**॥

ইতি রামো ধৃতিং কৃৎৱা মহাবাহুর্মহোদধিম্।
অধিশিশ্যে চ ৱিধিৱৎ প্রযতো নিযতো মুনিঃ॥ **6.21.9**॥

তস্য রামস্য সুপ্তস্য কুশাস্তীর্ণে মহীতলে।
নিযমাদপ্রমত্তস্য নিশাস্তিস্রোঽভিজগ্মতুঃ॥ **6.21.10**॥

স ত্রিরাত্রোষিতস্তত্র নযজ্ঞো ধর্মৱৎসলঃ।
উপাসত তদা রামঃ সাগরং সরিতাং পতিম্॥ **6.21.11**॥

ন চ দর্শযতে রূপং মন্দো রামস্য সাগরঃ।
প্রযতেনাপি রামেণ যথার্হমভিপূজিতঃ॥ **6.21.12**॥

সমুদ্রস্য ততঃ ক্রুদ্ধো রামো রক্তান্তলোচনঃ।
সমীপস্থমুৱাচেদং লক্ষ্মণং শুভলক্ষণম্॥ **6.21.13**॥

অৱলেপঃ সমুদ্রস্য ন দর্শযতি যঃ স্ৱযম্।
প্রশমশ্চ ক্ষমা চৈৱ আর্জৱং প্রিযৱাদিতা॥ **6.21.14**॥

অসামর্থ্যফলা হ্যেতে নির্গুণেষু সতাং গুণাঃ।
আত্মপ্রশংসিনং দুষ্টং ধৃষ্টং ৱিপরিধাৱকম্॥ **6.21.15**॥

সর্ৱত্রোৎসৃষ্টদণ্ডং চ লোকঃ সৎকুরুতে নরম্।
ন সাম্না শক্যতে কীর্তির্ন সাম্না শক্যতে যশঃ॥ **6.21.16**॥

প্রাপ্তুং লক্ষ্মণ লোকেঽস্মিঞ্জযো ৱা রণমূর্ধনি।
অদ্য মদ্বাণনির্ভগ্নৈর্মকরৈর্মকরালযম্॥ **6.21.17**॥

নিরুদ্ধতোযং সৌমিত্রে প্লৱদ্ভিঃ পশ্য সর্ৱতঃ।
ভোগিনাং পশ্য ভোগানি মযা ভিন্নানি লক্ষ্মণ॥ **6.21.18**॥

মহাভোগানি মৎস্যানাং করিণাং চ করানিহ।
সশঙ্খশুক্তিকাজালং সমীনমকরং তথা॥ **6.21.19**॥

অদ্য যুদ্ধেন মহতা সমুদ্রং পরিশোষযে।
ক্ষমযা হি সমাযুক্তং মামযং মকরালযঃ॥ **6.21.20**॥

অসমর্থং ৱিজানাতি ধিক্ ক্ষমামীদৃশে জনে।
ন দর্শযতি সাম্না মে সাগরো রূপমাত্মনঃ॥ **6.21.21**॥

চাপমানয সৌমিত্রে শরাংশ্চাশীৱিষোপমান্।
সমুদ্রং শোষযিষ্যামি পদ্ভ্যাং যান্তু প্লৱঙ্গমাঃ॥ **6.21.22**॥

অদ্যাক্ষোভ্যমপি ক্রুদ্ধঃ ক্ষোভযিষ্যামি সাগরম্।
ৱেলাসু কৃতমর্যাদং সহস্রোর্মিসমাকুলম্॥ **6.21.23**॥

নির্মর্যাদং করিষ্যামি সাযকৈর্ৱরুণালযম্।
মহার্ণৱং ক্ষোভযিষ্যে মহাদানৱসঙ্কুলম্॥ **6.21.24**॥

এৱমুক্ত্বা ধনুষ্পাণিঃ ক্রোধৱিস্ফারিতেক্ষণঃ।
বভূৱ রামো দুর্ধর্ষো যুগান্তাগ্নিরিৱ জ্ৱলন্॥ **6.21.25**॥

সম্পীড্য চ ধনুর্ঘোরং কম্পযিৎৱা শরৈর্জগৎ।
মুমোচ ৱিশিখানুগ্রান্ ৱজ্রানিৱ শতক্রতুঃ॥ **6.21.26**॥

তে জ্ৱলন্তো মহাৱেগাস্তেজসা সাযকোত্তমাঃ।
প্রৱিশন্তি সমুদ্রস্য জলং ৱিত্রস্তপন্নগম্॥ **6.21.27**॥

তোযৱেগঃ সমুদ্রস্য সমীনমকরো মহান্।
স বভূৱ মহাঘোরঃ সমারুতরৱস্তথা॥ **6.21.28**॥

মহোর্মিমালাৱিততঃ শঙ্খশুক্তিসমাৱৃতঃ।
সধূমঃ পরিৱৃত্তোর্মিঃ সহসাসীন্মহোদধিঃ॥ **6.21.29**॥

ৱ্যথিতাঃ পন্নগাশ্চাসন্ দীপ্তাস্যা দীপ্তলোচনাঃ।
দানৱাশ্চ মহাৱীর্যাঃ পাতালতলৱাসিনঃ॥ **6.21.30**॥

ঊর্মযঃ সিন্ধুরাজস্য সনক্রমকরাস্তথা।
ৱিন্ধ্যমন্দরসঙ্কাশাঃ সমুৎপেতুঃ সহস্রশঃ॥ **6.21.31**॥

আঘূর্ণিততরঙ্গৌঘঃ সম্ভ্রান্তোরগরাক্ষসঃ।
উদ্ৱর্তিতমহাগ্রাহঃ সঘোষো ৱরুণালযঃ॥ **6.21.32**॥

ততস্তু তং রাঘৱমুগ্রৱেগং
প্রকর্ষমাণং ধনুরপ্রমেযম্।
সৌমিত্রিরুৎপত্য ৱিনিঃশ্ৱসন্তং
মামেতি চোক্ত্ৱা ধনুরাললম্বে॥ **6.21.33**॥

এতদ্ৱিনাপি হ্যুদধেস্তৱাদ্য
সম্পৎস্যতে ৱীরতমস্য কার্যম্।
ভৱদ্ৱিধাঃ ক্রোধৱশং ন যান্তি
দীর্ঘং ভৱান্ পশ্যতু সাধুৱৃত্তম্॥ **6.21.34**॥

অন্তর্হিতৈশ্চাপি তথান্তরিক্ষে
ব্রহ্মর্ষিভিশ্চৈৱ সুরর্ষিভিশ্চ।
শব্দঃ কৃতঃ কষ্টমিতি ব্রুৱদ্ভি -
র্মামেতি চোক্ত্ৱা মহতা স্ৱরেণ॥ **6.21.35**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে যুদ্ধকাণ্ডে একৱিংশঃ সর্গঃ॥